International Journal of Sanskrit Research 2019; 5(5): 145-148

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(5): 145-148
© 2019 IJSR
www.anantaajournal.com
Received: 28-07-2019
Accepted: 30-08-2019

**मीनाक्षी**
शोधच्छात्रा, व्याकरणविभागः
राष्ट्रिय–संस्कृत–संस्थानम्
वेदव्यासपरिसरः, हिमाचलप्रदेश, भारत

**Corresponding Author:**
**मीनाक्षी**
शोधच्छात्रा, व्याकरणविभागः
राष्ट्रिय–संस्कृत–संस्थानम्
वेदव्यासपरिसरः, हिमाचलप्रदेश, भारत

# भट्टिकाव्यगतानामुदाहरणानामष्टाध्यायीक्रमानुसारितया संयोजनं विवेचनं च

**मीनाक्षी**

**प्रस्तावना**

व्याक्रियन्ते.व्युत्पाद्यन्ते प्रकृतिप्रत्ययविभागेन शब्दाः अनेनेति व्याकरणम्। व्याकरणमाश्रित्यैव पदपदार्थबोधः वाक्यवाक्यार्थनिर्णयश्च जायते। अत एव षट्स्वपि वेदाङ्गेषु व्याकरणस्य प्राधान्यमब्रवीत् महर्षिपतञ्जलिः ''ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च। प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति।''

वाक्यवाक्यार्थनिश्चयः पदपदार्थबोधश्च व्याकरणनिमित्तक इति व्याकरणस्य प्राधान्यं सुवचम्।

व्याकरणप्रक्रियां सरसरीत्या शिक्षयितुं, व्याकृतानां पदानां प्रयोगाभ्यासं च कारयितुं प्राचीनकालादेव व्याकरणोदाहरणसमापनीयानां काव्यानां रचनायाः परम्परा विद्यते। महाभाष्ये प्रयोगप्रदर्शनप्रसङ्गे उद्धृतैः कतिपयैः पद्यैरेतस्याः परम्परायाः सङ्केतो लभ्यते।

'स्तोष्याम्यहं पादिकमौदवाहिं ततः श्वभूते शातनीं पातनीं च।
नेतरावागच्छतां धारणिं रावणिं च ततः पश्चात् स्रंस्यते ध्वंस्यते च।। [1]
बहूनामप्यचित्तनामेको भवति चित्तवान्।
पश्य वानरसैन्येऽस्मिन् पदकर्मकमुपतिष्ठते।।
मैवं मंस्थाः सचित्तोऽयमेषोऽपि हि यथा वयम्।
एतदप्यस्य कापेयं यदकर्मकमुपतिष्ठति।। [2]

महाभाष्ये सूत्रोदाहरणानामवबोधने एव व्याकरणस्य पूर्णता दर्शिता। यथा चोक्तं पतञ्जलिना.'लक्ष्यलक्षणे व्याकरणम्, लक्ष्यं लक्षणं चैतत् समुदितं व्याकरणं भवति। [3]

अनेन ज्ञायते यत् प्रक्रियानुसारेण शब्दनिष्पत्तौ सत्यामपि यावद् उदाहरणनामर्थाः नावबुध्यन्ते तेषां प्रयोगश्च नावगम्यते, तावदपूर्णमिदं व्याकरणाध्ययनं तत्फलमपि च न कदाचिदवाप्यते। तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम्।

वैय्याकरणसम्प्रदाये संस्कृतमाध्यमेन अध्ययनाध्यापनपरम्परायाम् उदाहरणानामर्थसंगतिः स्यात् तथा च दैनिकव्यवहारे व्याकरणमधीयानाः छात्रा अपि उदाहरणानामर्थान् अवगच्छेयुः इति परमावश्यकमस्ति।

अत एव व्याकरणसिद्धानां पदानां प्रयोगपरिज्ञानाय प्राचीनकाले बहूनि काव्यानि विरचितानि। लौकिकसंस्कृतवाङ्मये महाकाव्यानां महत्त्वपूर्णं स्थानमस्ति। कालिदासदारभ्य अद्यावधि महाकाव्यानां विपुला परम्परा प्रसृता दृश्यते। कालिदासोत्तरवर्तिषु महाकाव्येषु पाण्डित्यप्रदर्शनयुता महाकाव्यपरम्परा समेधमाना अवलोक्यते। तत्रापि भट्टिभारविश्रीहर्षप्रभृतिमहाकवीनां महाकाव्यानि विशिष्ट महनवम् आश्रयन्तीत्यत्र नास्ति विचिकित्सालेशः। तेष्वपि रावणवधापरनामकं महाकविभट्टिप्रणीतं भट्टिकाव्यं पाणिनीयव्याकरणस्योदाहरणकाव्यत्वेन तदध्येतॄणां परमोपकारतया सातिशयं वैशिष्ट्यं भजते। यतो हि व्याकरणमूलकं सर्वं शास्त्रजातम्। न हि व्याकरणज्ञानमन्तरा कस्मिंश्चिदपि शास्त्रे प्रवेशः सम्भाव्यते। शब्दानां तात्त्विकज्ञान पुरस्सरमिष्टार्थेषु तत्प्रवृत्तिमूलत्त्वमवबुध्यते। तथा चोक्तं भर्तृहरिणा–

'अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते।। [4]

सम्प्रति उपलभ्यमानेषु उदाहरणाकाव्येषु भट्टिकाव्यं प्राचीनतममस्ति काव्येऽस्मिन् काव्यचारुत्वचमत्कारनिर्वाहे न तथा कवेः प्रवृत्ति प्रतीयते यथा पाणिनीयाष्टकसूत्राणामुदाहरणनिबन्धने। किंचिदपवादपुरस्सरं प्रायेण समेषां सूत्राणामुदाहरणप्रयोगे तत्परो दृश्यते महाकविभट्टिः।

भट्टिकाव्यातिरिक्तान्यपि बहूनि काव्यानि व्याकरणसिद्धानां पदानां प्रयोगज्ञानार्थं प्राणितान्यभूवन्। तानि कालक्रमेण लुप्तानि। तेषां कानिचिदुद्धरणानि महाभाष्यकाशिकादिषु प्रयोगप्रदर्शनप्रसङ्गे क्वचित् क्वचिदुद्धृतानि दृश्यन्ते। यथा–

दण्डादण्डि न कुर्वन्ति न कचाकचि कोकिलाः।
तथापि जितमेवभिर्वाग्भिरेव जगत्त्रयम्।। [5]
शलाकापर्यभिद्यूतं चतुष्पर्यक्षपर्यपि।
विपर्यस्ते विधौ पश्य नलादेरपि जायते।। [6]
ग्रामता जनता चैव बन्धुता च सहायता।
महेन्द्रस्याप्तगम्यासौ भूमिभागभुजां कुतः।। [7]

सम्प्रति उपलभ्यमानेषु उदाहरणकाव्येषु भट्टिकाव्यमेव प्राचीनतममस्ति। अत्र निरतिशयप्रौढतया उदाहरणानां प्रयोगाः प्रदर्शिताः सन्ति। भट्टिकाव्यस्य काल सप्तमं खीस्तशतकं मन्यते। एतस्य विद्वत्समाजे महती प्रसिद्धिः संजाता। परवर्तिभिः ग्रन्थकारैः प्रयोगपर्यालोचनप्रसङ्गे भट्टिकाव्यस्य उद्धरणानि बाहूल्यने प्रस्तूयन्ते। अष्टाध्याय्याः वृत्तिकारः पुरुषोत्तमदेवः, सिद्धहेमशब्दानुशासनस्य तदीयबृहद्वृत्तेश्च रचयिता हेमचन्द्राचार्यः, दुर्घटवृत्तिकारः शरणदेवः, अन्ये चापि बहवः प्रसिद्धाः वैय्याकरणाः विद्वांसः भट्टिकाव्यं यत्र–तत्र समुद्धरन्ति। एतेनास्य महत्त्वमुपयोगित्वं च सर्वविदितमस्ति।
इत्थं पाणिनीयसूत्रोदाहरणानां प्रयोगपरिज्ञानाय इदं मुख्यं सहायकं महाकाव्यमस्ति। एतास्मिन्नुदाहरणानां प्रयोगः प्रकरणानुसारितया अस्ति। परन्तु उदाहरणानां वाक्यगतप्रयोगप्रदर्शनाय मम शोधप्रबन्धेऽस्मिन् भट्टिकाव्यगतानाम् उदाहरणानाम् अष्टाध्यायीक्रमानुसारितया संयोजन विवेचनं च करिष्यते। येऽध्येतारोऽष्टाध्यायीक्रमानुसारेण व्याकरणमधीयानाः सन्ति, तेषां कृते तेनैव क्रमेण भट्टिकाव्यगतानामुदाहरणानां संयोजनं विशेषेण व्युत्पत्तिकरम् इति कार्यस्यास्यौचित्यं स्फुटमेव प्रकटीभवति। व्याकरणशास्त्रोदाहरणात्मकमिदं भट्टिकाव्यं महत्त्वपूर्णं स्थानं भजते। अष्टाध्यायीक्रमानुसारितया भट्टिकाव्यस्योदाहरणानां संयोजनम् अधोलिखितप्रकारेण अवगन्तुशक्यते। यथा–
प्रथमाध्यायस्य तृतीयपादस्य भावकर्मणोः, कर्त्तरि कर्मव्यतिहारे, न गतिहिंसार्थेभ्यः, इतरेतरान्योऽन्योपपदाच्च, नेर्विशः इत्यादीनाम् अष्टाध्यायीसूत्राणां क्रमानुसारेण भट्टिकाव्यस्योदाहरणानि प्रस्तूयन्ते। भावकर्मणोरिति सूत्रस्य भावे– ग्लायते भवता। सुप्यते भवता। आस्यते भवता इत्येतानि उदाहरणानि सन्ति तथा च कर्मणि–क्रियते कटः। ह्रियते भारः इत्येतानि सन्ति।

### भट्टिकाव्ये प्रयोगो यथा

अभायत यथार्केण सुप्रातेन शरन्मुखे।
गम्यमानं न तेनासीदगतं क्रामता पुरः।। [8]

हनुमतार्केण अभायत अदीप्यत। तेन गम्यमानम्।
कर्त्तरि कर्मव्यतिहारे। [9] इत्येतस्मिन् सूत्रे कर्मशब्दः क्रियावाची। व्यतिहारो विनिमयः। यत्रान्यसम्बन्धिनीं क्रियामन्यः करोति, इतरसम्बन्धिनीं चेतरः स कर्मव्यतिहारः। तद्विशिष्टक्रियावचनाद् धातोरात्मनेपदं भवति। व्यतिलुनते। व्यतिपुनते।

### भट्टिकाव्ये

धर्मोऽस्ति सत्यं इव राक्षसायमन्यो व्यतिस्ते तु ममापि धर्मः।
ब्रह्मद्विषस्ते प्रणिहन्मि येन राजन्यवृत्तिर्धृतकार्मुकेषु।। [10]

धर्मो व्यतिस्ते व्यतिभवते। व्यतिहारेण वर्तत इत्यर्थः।

वियति व्यत्यतन्वातां मूर्त्ती हरिपयोनिधी।
व्यत्यैतां चोत्तमं मार्गमर्केन्द्रेन्दुनिषेवितम्।। [11]

व्यत्यतन्वातां व्यतिविस्तारितवन्तौ। एवमन्यान्यपि उदाहरणानि अस्य सूत्रस्य सन्ति।
न गतिहिंसार्थेभ्यः [12] अर्थात् गत्यर्थेभ्यो हिंसार्थेभ्यश्च धातुभ्यः कर्मव्यतिहारे आत्मनेपदं न भवति। गत्यर्थेभ्यः–व्यतिगच्छन्ति। व्यतिसर्पन्ति। हिंसार्थेभ्यः–व्यतिहिंसन्ति व्यतिघ्नन्ति।

### भट्टिकाव्ये गत्यर्थकस्य प्रयोगः

व्यत्यैतां चोत्तमं मार्गमर्केन्द्रेन्दुनिषेवितम्।। [13]

मार्गं व्यत्यैताम् अन्योन्यमत्यक्रामताम्।

### हिंसार्थकस्य यथा

व्यतिघ्नन्ती व्यतिघ्नन्तं राक्षसीं पवनात्मजः।
जघानाविश्य वदनं निर्यान् भित्त्वोदरं द्रुतम्।। [14]

सः पवनात्मजो व्यतिघ्नन्ती घाते घातं कुर्वतीम्। राक्षसीं समुद्रादुत्थितां कांचन नक्तंचरीं व्यतिघ्नन् स्वयमपि घाते घ्नन्नेव। इतरेतरान्योऽन्योपपदाच्च [15] इत्यनेन इतरेतरोऽन्योऽन्य इत्येवमुपपदाद् धातोः कर्मव्यतिहारे आत्मनेपदं न भवति। इतरेतरस्य व्यतिलुनन्ति। अन्योन्यस्य व्यतिलुनन्ति।

### भट्टिकाव्ये

अन्योन्यं स्म व्यतियुतः शब्दान् शब्दैस्तु भीषणान्।
उदन्वांश्चानिलोद्धूतो म्रियमाणा च राक्षसी।। [16]

उदन्वान् प्रेयुषी निशाचरी च अन्योन्यमन्योन्यस्य शब्दान् शब्दैस्सह व्यतियुतः स्म मिश्रीकुरुतः।
नेर्विशः [17] इत्यस्मिन् सूत्रे नेः परस्माद् विश आत्मनेपदं भवति। निविशते। निविशन्ते।

### भट्टिकाव्ये

ततो वावृत्यमानासौ रामशालां न्यविक्षत।
मामुपायंस्त रामेति वरन्ती सादरं वचः।। [18]

रामशालां रामस्य पर्णकुटीरं न्यविक्षत प्रविष्टा।
अनेनैव प्रकारेण तृतीयाध्यायस्य प्रथमपादस्य कानिचिद् उदाहरणानि दिग्दर्शनार्थं प्रस्तूयन्ते। यथा–
'वदः सुपि क्यप् च' [19] इत्यत्र वद्धातोः सुबन्त उपपदेऽनुपसर्गे क्यप् प्रत्ययो भवति चकाराद् यच्च। ब्रह्मोद्यम्, ब्रह्मवद्यम्। सत्योद्यम्, सत्यवद्यम्।

### भट्टिकाव्यप्रयोगाः

अनृतोद्यं न तत्रास्ति, सत्यवद्यं ब्रवीम्यहम्।
मित्रभूयं गतस्तस्य रिपुहत्यां करिष्यसि।। [20]

सत्यवद्यं सत्यवचनं ब्रवीमि। अनृतोद्यमनृतवचनं नास्ति।

मृषोद्यं प्रवदन्ती तां सत्यवद्यो रघूत्तमः।
निरगाच्छत्रुहस्तं त्वं यास्यसीति शपन्वशी।। [21]

सत्यवद्यः सत्यवादी।
'भुवो भावे' [22] इत्यनेन भवतेर्धातो सुबन्त उपपदेऽनुपसर्गे भावे क्यप् प्रत्ययो भवति। ब्रह्मभूयं गतः, ब्रह्मत्वं गतः। देवभूयं गतः, देवत्वं गतः।

**भट्टिकाव्ये प्रयोगः**

> आसिष्ट नैकत्र शुचा व्यरंसीत् कृताकृतेभ्यः क्षितिपालभाग्भ्यः।
> स चन्दनोशीरमृणालदिग्धः शोकाग्निनागाद् द्युनिवासभूयम्।।[23]

शोकाग्निना द्युनिवासभूयं देवभूयं अगात्।

> मित्रभूयं गतस्तस्य रिपुहत्यां करिष्यसि।। [24]

मित्रभूयं मित्रभावं गतः।
इत्थं सम्पूर्णस्यापि भट्टिकाव्यस्याष्टाध्यायीक्रमानुसारितया संयोजनम् अष्टाध्यायीक्रमानुसारेण व्याकरणमधीयानानां कृते अतीव सुकरं व्युत्पत्तिकरं च भविष्यति।
भट्टिकाव्यस्य प्रयोगः काशिकायाम् अमरकोषे च प्रदर्शितादर्थात् विरुध्यते। बहवः प्रयोगाः भट्टिकाव्ये दृश्यन्ते ये प्राचीनपरम्पातो विरुध्यन्ते। तेषु केचनप्रयोगाणां समालोचनं विवेचनं च अत्र क्रियते। यथा– 'फलेग्रहिरात्मम्भरिश्च' [25] इत्यत्र फलेग्रहिरिति शब्दः निपात्यते। वृत्तिकारश्च कथयति–फलानि गृह्णन्ति इति फलेग्रहिर्वृक्ष इति। परन्तु भट्टिकाव्यस्य प्रयोगः भिन्न एवार्थेऽस्ति यथा–

> 'आत्मम्भरिस्त्वं पिशितैर्नराणां फलेग्रहीन् हंसि वनस्पतीनाम्।
> शौवस्तिकत्वं विभावा न येषां व्रजन्ति तेषां दयसे न कस्मात्।। [26]

अत्र फलेग्रहि शब्दो मुनीनां विशेषणत्वेन प्रयुक्तः। फलानि गृह्णन्ति भोजनार्थं स्वीकुर्वन्ति इति फलेग्रहयः मुनयः, तान् इति। एवमन्यान्यपि उदाहरणानि सन्ति यानि प्रौढ्या रूढ्यनादरेण योगमात्राश्रयेण प्रयुक्तानि सन्ति। तेषु एकमन्यदुदाहरणमत्र प्रस्तूयते। पंचमाध्यायस्य द्वितीये पादे 'यथामुखसम्मुखस्य दर्शनः खः' इति सूत्रस्य 'यथामुखं दर्शनः यथामुखीनः, सर्वस्य मुखस्य दर्शनः सम्मुखीनः' इति उदाहरणद्वयमपि अस्ति। यथामुखीन आदर्शः यथामुखीनं जलम् इत्युदाहरणवाक्यं भवति। मुखस्य सदृशः यथामुखं प्रतिबिम्बः दृश्यतेऽस्मिन्नित्यर्थः। यादृशं मुखमस्ति तादृशमेवास्मिन् दृश्यते इति भावः। एतेन मुखसदृशः प्रतिबिम्बः यत्रादर्शादौ दृश्यते तदेवमुच्यते। इत्थं वृत्तौ योऽयमुदाहरणार्थो व्याख्यातः स भाष्यस्याप्यनुकूलः एष एव च न्यासकृता पदमंजरीकारेण च समर्थ्यते। सिद्धान्तकौमुदीप्रभृतिषु व्याख्यानग्रन्थेषयमेवार्थः प्रतिपादितः। परन्तु भट्टिकाव्ये तु अतो भिन्न एवार्थे प्रयोगो दृश्यते–

> ततश्चित्रीयमाणोऽसौ हेमरत्नमयो मृगः।
> यथामुखीनः सीतायाः पुप्लुवे बहु लोभयन्।। [27]

इह कविना 'पदार्थानतिवृत्तौ यथाशब्द आश्रितः' इति हरदत्तः। तेन मुखमनतिक्रम्य=मुखस्य समक्षे=सम्मुखे पुप्लुवे इत्यर्थो भवति। एवं मते सति सूत्रगतस्य 'दर्शनः' इति पदस्य कथं सङ्गतिरिति हरदत्तेनापि न ज्ञापितम्, भट्टिना कथमस्य सङ्गति कृता स्याद् इति न विद्मः। अत्राचार्यचारुदेव आह– 'भट्टिकाव्य में यथामुखीनः सीताया पुप्लुवे बहु लोभ्यन्'' इस पद्य में यथा शब्द का पदार्थानतिवृत्ति में समास मानकर 'ख' प्रत्यय किया है। यह वृत्ति, न्यासपदमंजरी आदि के विरुद्ध है। इस अर्थ में 'दर्शनः' पद की सङ्गति भी नहीं''।
यद्यपीह भट्टिकाव्यटीकारेण जयमङ्गलेन– ''असौ मारीचो मायामृगीभूतः सन् हेमरत्नमयः– निर्मलत्वात् सीताया अग्रतो यथामुखीनः प्रतिबिम्बाश्रय इव भूत्वा पुप्लुवे भ्रमति स्म। इवशब्दलोपोऽत्र द्रष्टव्यः। 'यथामुखसम्मुखस्य दर्शनः खः। इति सूत्रानुसारितां दर्शयतेदं व्याख्यातम्। न चेत्थं व्याख्यायनमिदं सङ्गच्छत इति । अतिदुर्बोधतापि चेह न प्रतीयते। तथाप्यत्र सामान्येन यथामुखीनः मुखमनतिक्रम्य मुखस्य सम्मुखे इत्येवार्थो गम्यते। अत एव हरदत्तमिश्रेण तत्त्वबोधिनीकृता व्याकरणचन्द्रोदयकारेण चात्रायमेवार्थः कवेरभिमतो मतः। अथापरोऽपि यथामुखीन इति प्रयोगो दृश्यते भट्टिकाव्ये, यत्रैवं सूत्रानुसारितापि साधयितुमशक्या। एतत् खलु हेत्वन्तरमत्र यद् अमुमेवार्थं स प्रकृतोदाहरणस्य मन्यत इति। अथैषः स प्रयोगः–

> मानेन तल्पेष्वयथामुखीना मिथ्याप्रसुप्तैर्गमितत्रियामाः।
> स्त्रीभिर्निशातिक्रमविह्वलाभिर्दृष्टेऽपि दोषे पतयोऽनुनीताः।।[28]

इह अयथामुखीना मुखमतिक्रम्य वर्न्तमानाः पराङ्मुखाः सन्त इति स्फुटं कवेर्भावो द्योत्यते। अत्रापि जयमङ्गलेन दुरूहदल्पनया यथाकथमपि प्रकृतप्रयोगस्य सूत्रानुसारितां साधयितुमायासः कृतः। परमेतन्न सहजं प्रतीयते। आतश्च यथामुखीनः मुखमनतिक्रम्य वर्तमानः सम्मुखे विद्यमान इत्यवार्थोऽत्र भट्टिकवेरभिमत इति। तदेतद् भाष्यवृत्त्यादिव्याख्यानाद् भिद्यते। उत्सूत्रोऽयं प्रयोग इत्याचार्य चारुदेवः। एवमन्येऽपि बहवः प्रयोगाः सन्ति ये प्राचीन परम्परातो विरुध्यन्ते।
महाकाव्यमिदं सप्तमे ख्रीस्तशतके रचितमस्ति बहोः दीर्घकालाद् हस्तलिखितप्रतिलिपिपरम्परया अस्मान् प्रति आगतम्। तत्र च लिपिकाराणाम् कारणात् बहुत्र प्रयोगणामर्थावधारणमपि संदिग्धं जायते। एतादृशाः पाठभेदाः च स्थले स्थले सूच्यन्ते। तथा हि जयमङ्गलः निम्नश्लोकानां व्याख्याने पाठान्तरस्थितिं सूचयति–

> स प्रोषिवानेत्य पुरं प्रवेक्ष्यन् शुश्राव घोषं न जनौघजन्यम्।
> आकर्णयामास ने वेदनादान् न चोपलेभे वणिजां पणायान्।। [29]

अत्र जयमङ्गलः इयन्ते प्राप्यन्ते वणिग्भिरिति अयाः– लाभाः, एरच् [30] इति इणः कर्मणि अच्। पणानाम् अयाः पणायाः तानिति। 'पणायमिति पाठान्तरम्' वणिजां स्तुतिं संव्यवहारविषयां नोपलेभे। संव्यवहारकुशलाः साधव इति गुपादिषु स्तुत्यर्थपणिना साहचर्यात् पणेरपि तदर्थादेवायप्रत्ययः। 'वणिजां प्रलापान् इति तृतीयः पाठः'। वणिक् प्रसारकलहानित्यर्थः।

> लब्धां ततो विश्वजनीनवृत्तिस्तामात्मनीनामुदवोढ रामः।
> सद्रत्नमुक्ताफलभर्मशोभां सम्बंहयन्ती रघुवर्ग्यलक्ष्मीम्।। [31]

अत्रापि जयमङ्गलः सती उत्कृष्टा रत्नादिशोभा यस्याः। तैरलङ्कृतत्वात्। तां सद्रत्नमुक्ताफलभर्मशोभाम्। भर्म स्वर्णम्। सर्वधातुभ्यो मनिन्। 'भर्मभूषाम्' इति पाठान्तरम्। सद्रत्नादिभूषा अलङ्कारो यस्या इति योज्यम्। गुरोश्च हलः [32] इत्यकारः।

> सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनपारीत् सममंस्तबधून्।
> व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च।। [33]

पितॄनपारीदाप्यायितवान्। पितरमुद्दिश्य यजनम् 'पॄ पालनपूरणयोः' इत्यस्मात्पूरणार्थाल्लुङिरूपम्। सिचि वृद्धिः। इट ईटि [34] इति सिचो लोपः। अथवा 'पितॄनताप्र्सीत्' इति पाठः। 'तृप, प्रीणने' इत्यस्माल्लुङि 'स्पृशमृशकृशतृपदृपां च्लेः सिज्वक्तव्यः' इति च्लेः सिचि। अनुदात्तस्य च [35] इत्यादिना अमभावपक्षे रूपम्। पितॄंस्तर्पितवान् इत्यर्थः।
इत्थं विविधाः पाठभेदाः कवेरभिप्रेतप्रयोगविषये सन्देहं जनयन्ति। अनेनैव प्रकारेण संदिग्धार्थानाम् अस्पष्टार्थानां मतभेदग्रस्तानाम् उदाहरणानां विवेचनमिह शोधकार्ये विधास्यते। इत्थमयमत्र विवेचनप्रकारः–

> सन्दिग्धार्थविनिर्णयः क्वचिदपि व्याख्यातृहेतूक्तिभिः।
> मीमांसा क्वचिदर्थभेदविषये ग्रन्थान्तरालम्बनात्।।
> अज्ञातार्थगवेषणाय कुहचित् सम्भावनोद्भावना।
> ज्ञातेऽर्थे च कविप्रयोगसहितं वैशद्यसम्पादनम्।।

## सन्दर्भ सूची


1. महाभाष्यम्– 1.1.56
2. महाभाष्यम्– 1.3.25
3. पस्पशाह्निकम्
4. वाक्यपदीयम्, ब्रह्मकाण्डे– 13 श्लोक
5. श्रृंगारप्रकाशः– 2.58
6. श्रृंगारप्रकाशः– 2.56
7. काशिकावृत्तिः– 3.2.26
8. भट्टिकाव्यम्– 8.2
9. काशिकावृत्तिः– 1.3.14
10. भट्टिकाव्यम्– 2.35
11. भट्टिकाव्यम्– 8.3
12. काशिकावृत्तिः– 1.3.15
13. भट्टिकाव्यम्– 8.3
14. भट्टिकाव्यम्– 8.5
15. काशिकावृत्तिः– 1.3.16
16. भट्टिकाव्यम्– 8.6
17. काशिकावृत्तिः– 1.3.17
18. भट्टिकाव्यम्– 4.28
19. काशिकावृत्तिः– 3.1.106
20. भट्टिकाव्यम्– 6.54
21. भट्टिकाव्यम्– 5.60
22. काशिकावृत्तिः– 3.1.107
23. भट्टिकाव्यम्– 3.21
24. भट्टिकाव्यम्– 3.21
25. काशिकावृत्तिः– 3.2.26
26. भट्टिकाव्यम्– 2.33
27. भट्टिकाव्यम्– 5.48
28. भट्टिकाव्यम्– 11.4
29. भट्टिकाव्यम्– 3.27
30. काशिकावृत्तिः– 3.3.56
31. भट्टिकाव्यम्– 2.48
32. काशिकावृत्ति– 3.3.103
33. भट्टिकाव्यम्– 1.2
34. अष्टाध्यायी– 8.2.28
35. अष्टाध्यायी– 6.1.58